# वार्षिकः पाठ्यक्रमः
# सत्रम्– 2018–19
## कक्षा– दशमी
# विषय : संस्कृतम्

| प्रथमसत्रस्य पाठ्यक्रमः अप्रैल 2018 तः सितम्बर 2018 पर्यन्तम् | |
|---|---|
| ध्यातव्यः– वार्षिकपरीक्षायां (सत्रान्ते) सम्पूर्ण–पाठ्यक्रमात् प्रश्नोत्तराणि भविष्यन्ति | |
| विषयवस्तु | गतिविधयः |
| स्वपरिचयः– | शिक्षकः त्रिवारं स्वकीयं परिचयं वदति – मम नाम ........। पुनः छात्रान् पृच्छति – भवतः नाम किम्? अनेन प्रकारेण शिक्षकः संस्कृतमाध्यमेन परिचयात्मकवाक्यानि (न्यानातिन्यूनं 10 वाक्येषु) पाठयितुं शक्नोति।<br>विषयं प्रति रुचिवर्धनाय, संस्कृत– माध्यमेन अध्ययनाय प्रेरयितुम्, आत्मविश्वासं च वर्धयितुम्। |
| मणिका, भाग 2<br>प्रथमः पाठः –<br>वाङ्मयः तपः | शिक्षकः पाठस्य आदर्शवाचनं करिष्यति तदनु छात्रान् च कारयिष्यति। श्लोकानां सस्वरवाचनं सरलार्थज्ञानं भावार्थज्ञानम् च कारयेत्। पाठाधारितानां प्रश्नोत्तराणां पर्यायपदानां विलोमपदानां विशेषण–विशेष्यपदानां च अभ्यासः। नैतिकमूल्यानां निर्देशः अभ्यासकार्यम्।<br>• मूल्यशिक्षा –सत्यं प्रियं च सदा वक्तव्यम्।<br>• जीवनकला – सत्यमयं आचरणं करणीयम्। |
| व्याकरणवीथिः<br>प्रथमः अध्यायः वर्णविचारः | (केवलं पठनाय)<br>माहेश्वरसूत्रम्, वर्णमाला तद्भेदाश्च (स्वर–व्यञ्जन–विसर्ग–अनुस्वारज्ञानम् अभ्यासश्च), स्फोरकपत्रमाध्यमेन वर्णोच्चारणस्थानशिक्षणम् उच्चारणाभ्यासः लेखनाभ्यासश्च।वर्णसंयोजनेन पदनिर्माणं पदच्छेदः वर्णेषु च। |
| मणिका, भाग 2<br>संस्कृत–अभ्यास–पुस्तकम् तथा व्याकरणवीथिः | सन्धिः – परिभाषा सोदाहरणं भेदाश्च।<br>स्वरसन्धिः – दीर्घः, गुणः, वृद्धिः, यण्, अयादिः, पूर्वरूपम् च। |
| मणिका, भाग 2<br>द्वितीयः पाठः<br>'आज्ञा गुरूणां हि अविचारणीया' | गद्यवाचनस्य अभ्यासः, श्लोकानां सस्वरवाचनस्य अभ्यासः कण्ठस्थीकरणञ्च। संस्कृतशिक्षणविध्यनुसारं पाठस्य भावार्थबोधः। पाठे आगतानां कर्तृ–क्रिया–अव्ययपदानां, विशेषण–विशेष्यपदानां, पर्यायविलोमपदानां चयनम्। अभ्यासकार्याय कक्षायां शिक्षकः प्रश्नशः चर्चां करिष्यति। शिक्षकस्य निर्देशानुसारं छात्राः गृहकार्यं सम्पादयिष्यन्ति।<br>अन्यगतिविधयः – 'गुरोः आज्ञा अविचारणीया' इति विषये छात्राः चर्चां करिष्यन्ति स्वकीयं भावं च लेखिष्यन्ति।<br>• लोभस्य दुष्परिणामविषये चर्चा<br>• चिकित्साशास्त्रीयचर्चा – वानराणां मेदसा औषधनिर्माणप्रक्रिया उपचारप्रक्रिया च विषये चर्चा।<br>• मूल्यशिक्षा –<br>▪ हितकारी वाणी मन्तव्या।<br>▪ ज्येष्ठाः सम्माननीयाः।<br>• जीवनकला – गुरूणां ज्येष्ठानां च आज्ञा पालनीया। |

| | |
|---|---|
| मणिका,<br>अभ्यासपुस्तकम्भाग 2<br>समास | वाक्येषु समस्तपदानां विग्रहः विग्रहपदानां च समासः।<br>तत्पुरुषः – विभक्तिभेदसहितः, नञ्, उपपदः, कर्मधारयः, द्विगुः। |
| मणिका, भाग 2<br>तृतीयः पाठः<br>किं किम् उपादेयम् | श्लोकानाम् उच्चारणाभ्यासः। श्लोकान्वयानुसारं भावार्थबोधनम्।<br>श्लोकाधारितप्रश्नोत्तराणाम् कक्षायां परिचर्चां कृत्वा शिक्षकः गृहकार्याय अभ्यासकार्यं कर्तुम् छात्रान् प्रेरयेत् पुस्तिकां च परीक्षेत्। शिक्षकः पुस्तिकापरीक्षणानन्तरं कक्षायां सामूहिकरूपेण छात्रशः वा पाठगतविविधप्रश्नोत्तरं प्रष्टुं शक्नोति।<br>गतिविधयः – छात्रसंसदि नैतिकताविषये परिचर्चा। नैतिकताविषयकं वाक्यं सूक्तीनां वा संग्रहणं कृत्वा श्यामपट्टे उत्तरपुस्तिकायां वा लेखिष्यन्ति।<br>• मूल्यशिक्षा – जीवने अग्राह्यस्य त्यागेन फलं सुखकरं भवति।<br>• जीवनकला – सत्यासत्ययोः विवेकः। |
| मणिका, अभ्यासपुस्तकम्<br>भाग 2<br>द्वितीयः अभ्यासः<br>तथा<br>व्याकरणवीथिः<br>'अव्ययपदानि' | अव्ययस्य परिचयः<br>अव्ययपदानि – अपि, इव, उच्चैः, एव, नूनम्, पुरा, इतस्ततः, अत्र–तत्र, इदानीम्, यथा–तथा, विना, सहसा, अधुना, वृथा, शनैः, इति, कदा, उपर्युक्तानाम् अव्ययपदानां भावार्थः वाक्यप्रयोगः (प्रत्येकस्य 5 वाक्यानि) अभ्यासश्च।<br>गतिविधियः – दैनिकजीवने सम्भाषणे लेखने च एतेषाम् अव्ययपदानां प्रयोगाय छात्राः प्रेरणीयाः।<br>विविधस्फोरकपत्रेषु लिखितानि अव्ययपदानि एकैकशः प्रदर्श्य लघुलघुवाक्यानि वक्तुं छात्राः प्रेरणीयाः। |
| मणिका अभ्यासपुस्तकम्<br>भाग 2<br>'समयः' | (सामान्य–सपाद–सार्ध–पादोन)<br>शब्देषु संख्या वक्तव्या न तु अंकेषु पूर्णसंख्यावाचकसमयः यथा – 5.00–पञ्चवादनम् सपादयुक्त संख्यावाचकसमयः– 5.15–सपादपञ्चवादनम्, सार्धयुक्तसंख्यावाचकसमयः – 5.30 सार्धपञ्चवादनम्।<br>गतिविधयः – साक्षात् घटीं, कृत्रिमघटीं प्रदर्श्य अथवा श्यामपट्टे घटीचित्रं विलिख्य समयाभ्यासः मौखिकरूपेण लेखनेन वा भवेत्।<br>कक्षायां गृहे वा संस्कृत–शब्देषु समयवाचकसंख्या वक्तव्या। |
| मणिका, भाग 2<br>चतुर्थः पाठः<br>'नास्ति त्यागसमं सुखम्' | गद्यवाचनस्य अभ्यासः, गद्यांशाधारितप्रश्नोत्तराणामभ्यासः, अभ्यासकार्यम्। नैतिकमूल्यात्मकप्रश्नाः।<br>गतिविधयः – शिक्षकः नेत्रदानस्य (अङ्गदानस्य) महत्वं बोधयति।<br>मूल्यशिक्षा – त्यागस्य महत्त्वम्, परोपकारः।<br>जीवनकला – निःस्वार्थसेवाभावः। |
| मणिका अभ्यासपुस्तकम्<br>भाग 2 प्रत्ययाः | कृदन्ताः – तव्यत्, अनीयर्,<br>तद्धिताः– मतुप्, इन्, ठक्,<br>स्त्रीप्रत्ययः – टाप्<br>प्रचलितानाम् उदाहरणानां लेखनाभ्यासः मौखिकाभ्यासः। छात्राः प्रत्ययानां संयोजनेन पदानि रचयन्ति तेषां वाक्येषु प्रयोगं करिष्यन्ति।<br>गतिविधयः – स्फोरकपत्रमाध्यमेन प्रत्ययानाम् अभ्यासः। |
| मणिका, भाग 2<br>पञ्चमः पाठः<br>अभ्यासवशगं मनः | श्लोकानां शुद्धोच्चारणस्याभ्यासः, श्लोकान्वयस्य अभ्यासः भावार्थबोधनम्<br>श्लोकाधारितप्रश्नोत्तराणामभ्यासः,अभ्यासकार्यम्<br>गतिविधयः – पापकर्मणि के के भावाः प्रेरयन्ति इति छात्राणां सहायतया तान् |

| | |
|---|---|
| | मनोभावान् स्फोरकपत्रे श्यामपट्टे वा लेखनीयः। मनोभावानां मनोवैज्ञानिक–रीत्या विश्लेषणम्।<br>मूल्यशिक्षा – क्रोधः विनाशस्य कारणम्।<br>जीवनकला – अभ्यासेन वैराग्येण च मनसः निग्रहः। |
| मणिका, भाग 2<br>षष्ठः पाठः<br>साधुवत्तिं समाचरेत् | गद्यवाचनस्य अभ्यासः, गद्यांशाधारितप्रश्नोत्तराणामभ्यासः, अभ्यासकार्यम्। कक्षायां सामूहिकरूपेण छात्रशः वा शिक्षकः प्रश्नान् प्रक्ष्यति। मौखिकाभ्यासः कण्ठस्थीकरणञ्च।<br>गतिविधयः – सत्कर्मणः लाभः दुष्कर्मणः हानिः च भवति इति कक्षायां चर्चां कृत्वा पृथक्–पृथक् लेखनीयानि तान् हानिलाभान्।<br>मूल्यशिक्षा – दुष्टजनैः सह मित्रता न करणीया<br>जीवनकला –चौर्यवृत्तिं सर्वथा परित्यज्य स्वोपार्जितधनस्य उपभोगः करणीयः। |
| संख्या | एकतः चतुर्पर्यन्तम् त्रिषु लिङ्गेषु वाक्यप्रयोगः अभ्यासश्च। एकतः शतपर्यन्तं संख्याज्ञानम्। मौखिकाभ्यासः लेखनाभ्यासः। |
| मणिका अभ्यासपुस्तकम्<br>भाग 2<br>अपठित अवबोधनम् | अस्य पुस्तकस्य सहायतया अनुच्छेदं पठित्वा तेनाधारेण एकपदेन, पूर्णवाक्येन अथवा यथानिर्देशं प्रश्नोत्तराणाभ्यासः। भाषिककार्याय तत्त्वानि वाक्ये<br>कर्तृ–क्रियापदचयनम्, कर्तृ–क्रिया–अन्वितिः,विशेषण–विशेष्य चयनम्,<br>सर्वनामप्रयोगः, पर्याय–विलोमपद चयनम्<br>पाठ्यपुस्तकव्याकरणपुस्तकाधारेण उपरोक्त तत्त्वानां सामान्यपरिचयपूर्वकम् अभ्यासः। अनेन प्रकारेण अन्य अपठित–अवबोधनानाम् अभ्यासः। |
| मणिका अभ्यासपुस्तकम्<br>भाग 2 'औपचारिकं पत्रम्' | • रुग्णतायाः कारणात् अवकाशप्राप्तये प्रधानाचार्यं प्रति पत्रम्।<br>• पुस्तकानि प्रेषयितुं प्रकाशकं प्रति पत्रम् इत्यादयः।<br>मञ्जूषाधारितपत्रलेखनाभ्यासः। |
| मणिका अभ्यासपुस्तकम्<br>भाग 2<br>चित्रवर्णनम् | चित्राधारितं वर्णनम्।<br>छात्राः चित्रं वीक्ष्य मनसि लघु–लघु वाक्यानि परिकल्पयन्ति। संस्कृतेन न्यूनातिन्यूनं पञ्च वाक्यानि लेखनीयानि। छात्राणां सहायतायाः कृते मञ्जूषायां सङ्केतपदानि प्रदत्तानि सन्ति।<br>नेत्रहीनस्य कृते – अनुच्छेदलेखनम्। |
| मणिका अभ्यासपुस्तकम्<br>भाग 2<br>वाच्यपरिवर्तनम् | कर्तृवाच्यतः कर्मवाच्ये भाववाच्ये च परिवर्तनम् तथा च कर्मवाच्य–भाववाच्यतः कर्तृवाच्ये परिवर्तनम्। |
| मणिका अभ्यासपुस्तकम्<br>भाग 2 | ''अशुद्धिसंशोधनम्''<br>वचन–लिङ्ग–पुरूष–लकारदृष्ट्या अशुद्धि–संशोधनम्। |
| | प्रथमसत्रस्य सम्पूर्णपाठ्यक्रस्य पुनरावृत्तिः। |

| द्वितीयसत्रस्य पाठ्यक्रमः अक्टूबर 2018 तः मार्च 2019 पर्यन्तम् | |
|---|---|
| **विषयवस्तु** | **गतिविधयः** |
| मणिका, भाग 2<br>सप्तमः पाठः<br>'रमणीया हि सृष्टिरेषा' | संवादशैल्या पाठस्य आदर्शवाचनम्।<br>छात्राः पाठस्य पात्ररूपेण नाट्यं प्रस्तोष्यन्ति अथवा क्रमशः एकैकशः सर्वे छात्राः शिक्षकस्य संवादं श्रुत्वा अनुवदिष्यन्ति नाट्यांशाधातिरप्रश्नोत्तरणामभ्यासः अभ्यासकार्यम च।<br>मूल्यशिक्षा – संघे शक्तिः।<br>जीवनकला – स्वच्छपरिवेशे स्वस्थमनः भवति। |
| मणिकाअभ्यासपुस्तकम्<br>भाग 2<br>तथा व्याकरणवीथिः<br>सन्धिः | सन्धिः – परिभाषा सोदाहरणं भेदाश्च। व्यञ्जनसन्धिः – परसवर्णः, छत्वं, तुकागमः, मोऽनुस्वारः, वर्गीयप्रथमाक्षराणां तृतीयवर्णे परिवर्तनम्, प्रथमवर्णस्य पञ्चमवर्णे परिवर्तनम्।<br>विसर्गसन्धिः – विसर्गस्य उत्वं, रत्वम्, विसर्गलोपः, विसर्गस्य स्थाने स् श् ष् उपर्युक्तसन्धीनां नियमनिर्धारणं प्रयोगः अभ्यासश्च। |
| मणिका, भाग 2<br>अष्टमः पाठः–<br>'तिरुक्कुरल–सूक्ति सौरभम्' | श्लोकानां शुद्धोच्चारणस्याभ्यासः, श्लोकाधारित–प्रश्नोत्तराणामभ्यासः, अभ्यासकार्यम् च।<br>मूल्यशिक्षा – कर्तव्यबोधः<br>जीवनकला – विद्वान् इव आचरणम्। |
| मणिका अभ्यासपुस्तकम्<br>भाग 2<br>समासः | वाक्येषु समस्तपदानां विग्रहः विग्रहपदानां च समासः।<br>द्वन्द्वः, बहुब्रीहिः, समानाधिकरणः, अव्ययीभावः – अनु, उप, सह, निर्, प्रति, यथा। |
| मणिका, भाग 2<br>नवमः पाठः<br>'राष्ट्रं संरक्ष्यमेव हि' | संवादशैल्या पाठस्य वाचनम्, नाट्यांश–आधारितप्रश्नोत्तराणामभ्यासः, अभ्यासकार्यम् च।<br>योग्यताविस्तारः – प्राचीनास्त्राणाम् आधुनिकीकरणं युद्धविज्ञानं युद्धकलां च अधिकृत्य शिक्षकः चर्चां करिष्यति।<br>मूल्यशिक्षा – जनसंहारकभीषणास्त्राणां मानवेषु प्रयोगः सर्वथा वर्जितः।<br>जीवनकला – प्राचीनसंस्कृते विज्ञानस्य प्रयोगः। |
| मणिका अभ्यासपुस्तकम्<br>भाग 2तथा<br>व्याकरणवीथिः<br>'अव्ययपदानि' | कुतः, मा, यत्, यत्र–कुत्र, सम्प्रति, यदा–कदा, यावत्, श्वः, ह्यः, बहिः, कदापि, किमर्थम्।<br>उपर्युक्तानाम् अव्ययपदानां भावार्थः वाक्यप्रयोगः (प्रत्येकस्य 5 वाक्यानि) अभ्यासश्च।<br>गतिविधियः – दैनिकजीवने सम्भाषणे लेखने च एतेषाम् अव्ययपदानां प्रयोगाय छात्राः प्रेरणीयाः।<br>विविधस्फोरकपत्रेषु लिखितानि अव्ययपदानि एकैकशः प्रदर्श्य लघुलघुवाक्यानि वक्तुं छात्राः प्रेरणीयाः। |
| मणिका, भाग 2<br>दशमः पाठः<br>'सुस्वागतम् भो! अरुणाचलेऽस्मिन्' | संवादशैल्या पाठस्य वाचनम्, संवादाधारित–प्रश्नोत्तराणामभ्यासः, अभ्यासकार्यम् च।<br>गतिविधयः – अरुणाचलप्रदेशस्य मानचित्रं प्रदर्श्य तेन माध्यमेन अस्य प्रदेशस्य भौगोलिक–ऐतिहासिकमहत्त्वं प्रदर्शनीयम्।<br>मूल्यशिक्षा – विद्यालयपक्षतः शैक्षिकभ्रमणं आवश्यकम्।<br>जीवनकला – प्रमुखभारतीयपर्वणां दर्शनीयस्थलानां च ज्ञानम्। |

| | |
|---|---|
| मणिका अभ्यासपुस्तकम् भाग 2 तथा व्याकरणवीथिः प्रत्ययाः | कृदन्ताः – शतृ, शानच्<br>तद्धिताः– त्व, तल्<br>स्त्रीप्रत्यय– ङीप्<br>मणिका अभ्यासपुस्तकम् व्याकरणवीथिः इत्यनयोः पुस्तकयोः आधारेण प्रचलितानाम् उदाहरणानां लेखनाभ्यासः मौखिकाभ्यासः।<br>छात्राः प्रत्ययानां संयोजनेन पदानि रचयन्ति तेषां वाक्येषु प्रयोगं करिष्यन्ति।<br>गतिविधयः – स्फोरकपत्रमाध्यमेन प्रत्ययानाम् अभ्यासः। |
| मणिका भाग 2 एकादशः पाठः 'कालोऽहम् | गद्यांशस्य शुद्धोच्चारणाभ्यासः,<br>गद्यांशाधारित–प्रश्नोत्तराणामभ्यासः,अभ्यासकार्यम्।<br>गतिविधयः– घटीं प्रदर्श्य दिनचर्या वक्तव्या, अवस्थाभेदेन करणीयानि कार्याणि वक्तव्यानि।<br>मूल्यशिक्षा – कालः सर्वशक्तिमान् भवति।<br>जीवनकला – हिन्दूपंचांगस्य सामान्यज्ञानम्। |
| मणिकाअभ्यासपुस्तकम् भाग 2 'अनौपचारिकं पत्रम्' | • स्वभगिन्याः ज्येष्ठभ्रातुः वा विवाहे आमन्त्रयितुं स्वमित्रं प्रति पत्रम्।<br>• पितरौ प्रति परीक्षायाः परिणामसूचकं पत्रम् इत्यादयः।<br>मञ्जूषाधारितपत्रलेखनाभ्यासः। |
| | प्रथमसत्रस्य द्वितीयसत्रस्य च सम्पूर्णपाठ्यक्रमस्य पुनरावृत्तिः। |